श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

॥ श्री अच्युअसअअम् ॥

(श्री अच्युतशतकम्)

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री अच्चुअसअअम् ॥

(श्री अच्युतशतकम्)

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

**सिरिवेङ्कडणाहज्जो कइतक्किअसीहसव्वतन्तसतन्तो।
वेअन्तारिअवज्जो मह सण्णिज्झेउ सइ सअं हिअअम्मि॥**

श्रीवेङ्कटनाथार्यः कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रः।
वेदान्ताचार्यवर्यो मम संनिधत्तां सदा स्वयं हृदये॥

**णमह तिअसाण णाहं सच्चं दासाण अच्चुअं ठिरजोइम्।
गलुलणइतडतमालम् अहिन्दणअरोसहाअलेक्कगइन्दम्॥ 1 ॥**

नमत त्रिदशानां नाथं सत्यं दासानामच्युतं स्थिरज्योतिः।
गरुडनदीतटतमालम् अहीन्द्रनगरौषधाचलैकगजेन्द्रम्॥ 1 ॥

**किङ्करसच्च थुई तुह सअंभुगेहिणिविलासवाहित्तमई।
फणिआ बालेण मए पञ्जरसुअजप्पिअं व कुणउ पसाअम्॥ 2 ॥**

किङ्करसत्य स्तुतिस्तव स्वयंभूगेहिनीविलासव्याहृतमयी।
फणिता बालेन मया पञ्जरशुकजल्पितमिव करोतु प्रसादम्॥ 2 ॥

**मइलं वि भासिअं मह किङ्करसच्च तुह कित्तिजोण्हापसरे।
लग्गं लहउ विसुद्धिं रच्छासलिलं व तिवहआसोत्तगअम्॥ 3 ॥**

मलिनमपि भाषितं मम किङ्करसत्य तव कीर्तिज्योत्स्नाप्रसरे।
लग्नं लभतां विशुद्धिं रथ्यासलिलमिव त्रिपथगास्रोतोगतम्॥ 3॥

तत्थरिणएण ठविआ सोहउ तिअसाण णाह तुज्झ समाए।
वन्दित्तणमहिआणं मज्झम्मि सुईण बालिसा मज्झ थुई॥ 4॥

त्रस्तरिनयेन स्थापिता शोभतां त्रिदशानां नाथ तव समाजे।
वन्दित्वमहितानां मध्ये श्रुतीनां बालिशा मम स्तुतिः॥ 4॥

अम्हगुरूणम् अच्चुअ जीहासीहासणम्मि लद्धपइट्ठो।
पडिवाइअपरमट्ठो वारेसि अपण्डिअत्तणम् अम्हाणम्॥ 5॥

अस्मद्गुरूणामच्युत जिह्वासिंहासने लब्धप्रतिष्ठः।
प्रतिपादितपरमार्थो वारयस्यपण्डितत्वमस्माकम्॥ 5॥

हिअएसु देसिआणं जण्हइलहरीसु पुण्णचन्दो व्व फुडो।
कलुसजलेसु व हंसो कसाअकबुरेसु ठासि अच्चुअ ण खणम्॥ 6॥

हृदयेषु देशिकानां जाह्नवीलहरीषु पूर्णचन्द्र इव स्फुटः।
कलुषजलेष्विव हंसः कषायकर्बुरेषु तिष्ठस्यच्युत न क्षणम्॥ 6॥

आअममेत्तपमाणो आगोविअणं पआसणिअमाहप्पो।
सद्दहिअहिअअसुलहो दूरं मुअसि णअसच्च डोलाअन्ते॥ 7॥

आगममात्रप्रमाणः आगोपीजनं प्रकाशनिजमाहात्म्यः।
श्रद्धितहृदयसुलभो दूरं मुञ्चसि नतसत्य दोलायमानान्॥ 7॥

सइ खविअसअलहेअं सरणागअसच्च सच्चणाणाणन्दम्।
उल्लङ्घिअतिविहन्तम् उवणिसआणं सआइ गाअन्ति तुमम्॥ 8॥

सदा क्षपितसकलहेयं शरणागतसत्य सत्यज्ञानानन्दम्।
उल्लङ्घितत्रिविधान्तम् उपनिषदां शतानि गायन्ति त्वाम्॥ 8॥

कुणसि ण कीरसि केण वि ठावेसि ण सण्ठविज्जसि अणण्णठिओ।
हरसि णिहिलं ण हीरसि अहिन्दणअरिन्द अणहजोइफुरन्तो॥ 9॥

करोषि न क्रियसे केनापि स्थापयसि न संस्थाप्यसेऽनन्यस्थितः।
हरसि निखिलं न ह्रियसे अहीन्द्रनगरेन्द्रानघज्योतिः स्फुरन्॥ 9॥

अणुपमिअस्स वि अच्चुअ सत्ती तुह सअलधारणाइवहुत्ता।
तेण पडिवत्थुपुण्णो सुव्वसि अपडिहअणिअठिई सव्वगओ॥ 10॥

अणुप्रमितस्याप्यच्युत शक्तिस्तव सकलधारणादिप्रभूता।
तेन प्रतिवस्तुपूर्णः श्रूयसेऽप्रतिहतनिजस्थितिः सर्वगतः॥ 10॥

सअलाण धरणणिअमण सामित्तणणिअमसण्ठिओ सव्वतणू।
सुव्वसि अच्चुअ सव्वो सअ दंसिअकज्जकारणत्तणकबुरो॥ 11॥

सकलानां धरणनियमन स्वामित्वनियमसंस्थितः सर्वतनुः।
श्रूयसेऽच्युत सर्वः स्वयं दर्शितकार्यकारणत्वकर्बुरः॥ 11॥

पुरिसपहाणसरीरो भुवणाणं होसि अच्चुअ उवाआणम्।
णिअसङ्कप्पसणाहो वहसि णिमित्तत्तणं वि अब्भुअसत्ती॥ 12॥

पुरुषप्रधानशरीरो भुवनानां भवस्यच्युतोपादानम्।
निजसङ्कल्पसनाथो वहसि निमित्तत्वमप्यद्भुतशक्तिः॥ 12॥

विसमगुणङ्कुरपअरे जलं व सामण्णकारणं तुह केळी।
णिअकम्मसत्तिणिअआ अच्चुअ बम्हाइठावरन्तविसेसा॥ 13॥

विषमगुणाङ्कुरप्रकरे जलमिव सामान्यकारणं तव केळिः।
निजकर्मशक्तिनियताः अच्युत ब्रह्मादिस्थावरान्तविशेषाः॥ 13॥

पुरिसा तुज्झ विहूई अच्चुअ लच्छीअ इत्थिआसण्णाओ।
णत्थि परं तुज्झाणं सा वि सिरी होइ तुज्झ किम् उण इअरम्॥ 14॥

पुरुषास्तव विभूतिः अच्युत लक्ष्म्याः स्त्रीसंज्ञाः।
नास्ति परं युवयोः साऽपि श्रीर्भवति तव किं पुनरितरत्॥ **14** ॥

ण हु तुह सरिसब्भहिआ णाह तुमम् एव्व सव्वलोअसरण्णो।
एआव णाणसारम् इअ मुणिउं तिअसणाह इअरविइन्ता॥ 15 ॥

न खलु तव सदृशाभ्यधिकाः नाथ त्वमेव सर्वलोकशरण्यः।
एतावत् ज्ञानसारम् इति ज्ञातुं त्रिदशनाथेतरविचिन्ता॥ **15** ॥

भाइ फणिन्दउराहिव पडिवालेन्तेसु पाअडवहुत्तफला।
अवि दुहिणप्पमुहेहिम् आणत्ती तुह अलङ्घणिज्जपहावा॥ 16 ॥

भाति फणीन्द्रपुराधिप प्रतिपालयत्सु प्रकटप्रभूतफला।
अपि द्रुहिणप्रमुखैः आज्ञप्तिस्तवालङ्घनीयप्रभावा॥ **16** ॥

णिअमविहीण पउत्ती सव्वाण वि दाससच्च उद्दिसिअ तुमम्।
सद्धणिमन्तिअबम्हण समाहिसिद्धं लहन्ति तिअसा भुत्तिम्॥ 17 ॥

निगमविधीनां प्रवृत्तिः सर्वेषामपि दाससत्योद्दिश्य त्वाम्।
श्राद्धनिमन्त्रितब्राह्मण समाधिसिद्धां लभन्ते त्रिदशा भुक्तिम्॥ **17** ॥

आरज्झतिअसविलए अच्चुअ णिच्चं ण ठासि जइ णाम तुमम्।
कम्माण कप्पिआणं काहिइ कप्पन्तरेसु को णिव्वेसम्॥ 18 ॥

आराध्यत्रिदशविलयेऽच्युत नित्यं न तिष्ठसि यदि नाम त्वम्।
कर्मणां कल्पितानां करिष्यति कल्पान्तरेषु को निर्वेशम्॥ **18** ॥

कप्पेसि कङ्खिआइं कप्पदुमो व्व सिरिकञ्चणलआसहिओ।
णअसच्च सइ फलाइं णिअछाहिणिहिण्णणिच्चतावतिहुवणो॥ 19 ॥

कल्पयसि काङ्क्षितानि कल्पद्रुम इव श्रीकाञ्चनलतासहितः।
नतसत्य सदा फलानि निजच्छायानिर्भिन्ननित्यतापत्रिभुवनः॥ **19** ॥

सअलाअमाण णिट्ठा सअलसुराणं वि अन्तरो अप्पाणो।
सअलफलाण पसूई सअलजणाणं समो खु णअसच्च तुमम् ॥ 20 ॥

सकलागमानां निष्ठा सकलसुराणामप्यन्तर आत्मा।
सकलफलानां प्रसूतिः सकलजनानां समः खलु नतसत्य त्वम् ॥ **20** ॥

इअ सव्वाण समाणो सच्चठिओ दाससच्च सइ परिपुण्णो।
किह वहसि पक्खवाअं पण्डवपमुहेसु पेसणं वि सहन्तो ॥ 21 ॥

इति सर्वेषां समानः सत्यस्थितो दाससत्य सदा परिपूर्णः।
कथं वहसि पक्षपातं पाण्डवप्रमुखेषु प्रेषणमपि सहमानः ॥ **21** ॥

विसमम्मि कम्ममग्गे विपरिखलन्ताण वीहलिअकरणाणम्।
णाह णिहिलाण अण्णो णत्थि तुमाहि णअसच्च हत्थालम्बो ॥ 22 ॥

विषमे कर्ममार्गे विपरिस्खलतां विह्वलितकरणानाम्।
नाथ निखिलानामन्यो नास्ति त्वन्नतसत्य हस्तालम्बः ॥ **22** ॥

णाणस्स को अविसओ अच्चुअ कलुणाअ तुज्झ को दूरठिओ।
सत्तीअ को अइभरो ता खु उवाओ तुमं चिअ सअं सिद्धो ॥ 23 ॥

ज्ञानस्य कोऽविषयः अच्युत करुणायास्तव को दूरस्थितः।
शक्तेः कोऽतिभरः तस्मात् खलूपायस्त्वमेव स्वयं सिद्धः ॥ **23** ॥

सङ्कप्पकण्णहारो किङ्करसच्च भवसाअरे अइगहिरे।
अणहो तुमं खु पोओ अप्पाण किवासमीरणेण पउत्तो ॥ 24 ॥

सङ्कल्पकर्णधारः किङ्करसत्य भवसागरेऽतिगभीरे।
अनघस्त्वं खलु पोतः आत्मनां कृपासमीरणेन प्रयुक्तः ॥ **24** ॥

अच्चुअ ण दन्ति मोक्खम् ईसरभावेण भाविआ इअरसुरा।
रत्तिं परिवट्टेउं लक्खम् आलेक्खदिणअराण वि ण खमम् ॥ 25 ॥

अच्युत न ददति मोक्षम् ईश्वरभावेन भाविता इतरसुराः।
रात्रिं परिवर्तयितुं लक्षमालेख्यदिनकराणामपि न क्षमम्॥ **25**॥

अमिअरससाअरस्स व अहिन्दउरणाह णिम्मलमहग्घाइम्।
तीरन्ति ण विगणेउम् अणण्णसुलहाइ तुज्झ गुणरअणाइम्॥ 26॥

अमृतरससागरस्येव अहीन्द्रपुरनाथ निर्मलमहार्घाणि।
शक्नुवन्ति न विगणयितुम् अनन्यसुलभानि तव गुणरत्नानि॥ **26**॥

भूसिअसुइसीमन्तो भुअइन्दउरेस सव्वगुणसीमन्तो।
खविअतिसामळमोहो मुणीण हिअएसु फुरसि सामळमोहो॥ 27॥

भूषितश्रुतिसीमन्तो भुजगेन्द्रपुरेश सर्वगुणसीमान्तः।
क्षपिततृषामलमोहो मुनीनां हृदयेषु स्फुरसि श्यामळमयूखः॥ **27**॥

सुहलक्खणसिरिवच्छो सोहसि णिम्मुत्तविरहखणसिरिवच्छो।
रणदेवणसविहगओ उद्धणगलुलणइतीरवणसविहगओ॥ 28॥

शुभलक्षणश्रीवत्सः शोभसे निर्मुक्तविरहक्षणश्रीवत्सः।
रणदेवनसविधगतः उद्भटगरुडनदीतीरवनसविधगजः॥ **28**॥

अकुमारजोव्वणठिअम् अहिन्दउरणाह अहिमअम् अणुरूवम्।
णिच्चं सहावसिद्धं सुव्वइ सूरिमहिअं सुहं तुह रूवम्॥ 29॥

अकुमारयौवनस्थितम् अहीन्द्रपुरनाथाभिमतमनुरूपम्।
नित्यं स्वभावसिद्धं श्रूयते सूरिमहितं सुखं तव रूपम्॥ **29**॥

तिउणं तस्स विआरा अच्चुअ पुरिसोत्ति आअमगणिज्जन्ता।
अत्था तुह खु समत्ता परम्मि रूपम्मि भूसणत्थसरूवा॥ 30॥

त्रिगुणं तस्य विकाराः अच्युत पुरुष इत्यागमगण्यमानाः।
अर्थास्तव खलु समस्ताः परस्मिन् रूपे भूषणास्त्रस्वरूपाः॥ **30**॥

णिन्ति तुमाओ अच्चुअ णिक्खविअविवक्खणिट्ठुरपरक्कमणा।
सण्ठविअपरमधम्मा साहुपरित्ताणसप्फला ओआरा॥ **31** ॥

गच्छन्ति त्वत्तोऽच्युत निक्षपितविपक्षनिष्ठुरपराक्रमणाः।
संस्थापितपरमधर्माः साधुपरित्राणसत्फला अवताराः॥ **31** ॥

हरिमणिसरिच्छणिअरुइ हरिआअन्तभुअइन्दवुरपेरन्तो।
काले दासजणाणं कण्हघणो होसि दिण्णकालुण्णरसो॥ **32** ॥

हरिमणिसदृक्षनिजरुचि हरितायमानभुजगेन्द्रपुरपर्यन्तः।
काले दासजनानां कृष्णघनो भवसि दत्तकारुण्यरसः॥ **32** ॥

गलुलणइकच्छरण्णे लक्खिज्जसि लच्छिमहिकरेणुमणहरो।
दीसन्तबहुळदाणो दिसागइन्दो व्व खुडिअदणुइन्ददुमो॥ **33** ॥

गरुडनदीकच्छारण्ये लक्ष्यसे लक्ष्मीमहीकरेणुमनोहरः।
दृश्यमानबहुळदानो दिशागजेन्द्र इव खण्डितदनुजेन्द्रद्रुमः॥ **33** ॥

मुहचन्दमोळिदिणअर मज्झठिओ तुज्झ चिहुरभारन्धारो।
अघडिअघडणासत्तिं सच्चं ठावेइ दाससच्च समग्गम्॥ **34** ॥

मुखचन्द्रमौलिदिनकर मध्यस्थितस्तव चिकुरभारान्धकारः।
अघटितघटनाशक्तिं सत्यं स्थापयति दाससत्य समग्राम्॥ **34** ॥

परिहसिअपुण्णचन्दं पदुमसरिच्छप्पसण्णलोअणजुअळम्।
सङ्कप्पिअदुरिआइ वि संहरिअं हरइ दाससच्च तुह मुहम्॥ **35** ॥

परिहसितपूर्णचन्द्रं पद्मसदृक्षप्रसन्नलोचनयुगळम्।
सङ्कल्पितदुरितान्यपि संस्मृतं हरति दाससत्य तव मुखम्॥ **35** ॥

माहप्पं तुह महिअं मङ्गळिअं तुळसिकोत्थुहप्पमुहाणम्।
अच्चुअ ठिरवणमालं वच्छं दंसेइ लच्छिलक्खणसुहअम्॥ 36॥

माहात्म्यं तव महितं माङ्गळिकं तुलसीकौस्तुभप्रमुखानाम्।
अच्युत स्थिरवनमालं वत्सं दर्शयति लक्ष्मीलक्षणसुभगम्॥ **36**॥

णिव्विसइ णिन्ततावो देवअणो देवणाअअ विहिप्पमुहो।
सीअळसन्दवहुत्तं छाहिं तुह विउळबाहुकप्पदुमाणम्॥ 37॥

निर्विशति गच्छत्तापो देवजनो देवनायक विधिप्रमुखः।
शीतळसान्द्रप्रभूतां छायां तव विपुलबाहुकल्पद्रुमाणाम्॥ **37**॥

सङ्कप्पचन्दखोहिअ तिउणोअहिविउळबुब्बुअप्पअरेहिम्।
बम्हण्डेहि वि भरिअं किङ्करसच्च तुह कीस णु किसम् उअरम्॥ 38॥

सङ्कल्पचन्द्रक्षोभित त्रिगुणोदधिविपुलबुद्बुदप्रकरैः।
ब्रह्माण्डैरपि भरितं किङ्करसत्य तव कस्मान्नु कृशमुदरम्॥ **38**॥

णाहिरुहं तुह णळिणं भुअईसरणअरणाह सोहइ सुहअम्।
मज्झठिअबम्हभमरं वच्छासणलच्छिपाअवीढसरिच्छम्॥ 39॥

नाभिरुहं तव नळिनं भुजगेश्वरनगरनाथ शोभते सुभगम्।
मध्यस्थितब्रह्मभ्रमरं वत्सासनलक्ष्मीपादपीठसदृक्षम्॥ **39**॥

दिढपीडिअमहुकइढव सोणिअपडलपरिपाडलम्बरघडिआ।
राअइ अच्चुअ मुहला रइणाहगइन्दसिङ्कला तुह रसणा॥ 40॥

दृढपीडितमधुकैटभ शोणितपटलपरिपाटलाम्बरघटिता।
राजत्यच्युत मुखरा रतिनाथगजेन्द्रशृङ्खला तव रशना॥ **40**॥

दासाण सच्च दीसइ दाणववीराण दीहणिद्दासअणम्।
तुह उअरट्ठिअतिहुवण पासाअक्खम्भसच्छअम् ऊरुजुअम्॥ 41 ॥

दासानां सत्य दृश्यते दानववीराणां दीर्घनिद्राशयनम्।
तवोदरस्थितत्रिभुवन प्रासादस्तम्भसच्छायमूरुयुगम्॥ **41** ॥

जाणुमणिदप्पणेण अ जङ्घामरगअकळाइआए अ धणिआ।
अच्चुअ ण मुअइ कन्ती लच्छी व सरोअलञ्छणे तुह चलणे॥ 42 ॥

जानुमणिदर्पणेन च जङ्घामरकतकळाचिकया च धन्या।
अच्युत न मुञ्चति कान्तिः लक्ष्मीरिव सरोजलाञ्छनौ तव चरणौ॥ **42** ॥

सुइसीमन्तपसूणं सोहइ णअसच्च तुज्झ सव्वसरण्णम्।
कमणखणजणिअसुरणइ पसमिअतेल्लोक्कपाअअं पअपदुमम्॥ 43 ॥

श्रुतिसीमन्तप्रसूनं शोभते नतसत्य तव सर्वशरण्यम्।
क्रमणक्षणजनितसुरनदी प्रशमितत्रैलोक्यपातकं पदपद्मम्॥ **43** ॥

इअ तिहुवणेक्कमूळम् आसादेन्ति अणहा अमिअसाउरसम्।
ओसहिमहिहरपासे उइअं तुम् ओसहिं व दासरुआणम्॥ 44 ॥

इति त्रिभुवनैकमूलम् आस्वादयन्त्यनघा अमृतस्वादुरसम्।
औषधिमहीधरपार्श्वे उदितं त्वामौषधिमिव दासरुजाम्॥ **44** ॥

सिद्धञ्जणं व सामं तुज्झ तणुं णिअविलोअणेसु खिवन्ता।
अच्चुअ लच्छिणिवासं णिच्चणिऊढं णिहिं व पेच्छन्ति तुमम्॥ 45 ॥

सिद्धाञ्जनमिव श्यामां तव तनुं निजविलोचनेषु क्षिपन्तः।
अच्युत लक्ष्मीनिवासं नित्यनिगूढं निधिमिव पश्यन्ति त्वाम्॥ **45** ॥

विहडिअणिबिडन्धारो घडन्तजोई तिलोअएक्कगहवई।
दिट्ठिगओ जाण तुमं णमन्तसच्च ण हु ताण मोहतिआमा॥ 46 ॥

विघटितनिबिडान्धकारो घटमानज्योतिस्त्रिलोकैकग्रहपतिः।
दृष्टिगतो येषां त्वं नमत्सत्य न खलु तेषां मोहत्रियामा ॥ **46** ॥

विसअरसम्मि विरत्ता विआरजणणेहि वि ण हु विकीरन्ता।
जीवन्तमुक्कसरिसा अच्चुअ दीसन्ति पावणा तुह भत्ता ॥ 47 ॥

विषयरसे विरक्ताः विकारजननैरपि न खलु विक्रियमाणाः।
जीवन्मुक्तसदृशाः अच्युत दृश्यन्ते पावनास्तव भक्ताः ॥ **47** ॥

गन्धव्वणअरसिमिणअ सारिच्छाणं सिरीण वणसरिआणम्।
ण सुमरइ तुम्हगहिओ सरणागअसच्च सइमओ जीवगओ ॥ 48 ॥

गन्धर्वनगरस्वप्न सदृक्षाणां श्रीणां वनसरिताम्।
न स्मरति त्वद्गृहीतः शरणागतसत्य सदामदो जीवगजः ॥ **48** ॥

ण महेन्ति णाणवन्ता तरङ्गडिण्डीरबुब्बुअसरिच्छाइम्।
विहिपमुहाण पआइं घणकन्दळिकन्दकअळिखम्भसमाइम् ॥ 49 ॥

न महयन्ति ज्ञानवन्तः तरङ्गडिण्डीरबुद्बुदसदृक्षाणि।
विधिप्रमुखाणां पदानि घनकन्दळिकन्दकदळीस्तम्भसमानि ॥ **49** ॥

पुळइअसपरसहावा पुरिसा घेत्तूण सामिणो तुह सीळम्।
णाह णअसच्च सघिणा ण मुअन्ति कहं वि सव्वजणसोहद्दम् ॥ 50 ॥

दृष्टस्वपरस्वभावाः पुरुषा गृहीत्वा स्वामिनस्तव शीलम्।
नाथ नतसत्य सघृणाः न मुञ्चन्ति कथमपि सर्वजनसौहार्दम् ॥ **50** ॥

माणमएसामच्छर डम्भासूआभआमरिसलोहमुहा।
दीसन्ति ण मोहसुआ दोसा दासाण सच्च तुह भत्ताणम् ॥ 51 ॥

मानमदेर्ष्यामत्सर दम्भासूयाभयामर्षलोभमुखाः।
दृश्यन्ते न मोहसुताः दोषा दासानां सत्य तव भक्तानाम् ॥ **51** ॥

जाण मई इअरमुही काळो सअळो वि ताण कलिवित्थारो।
जे तुह पअम्मि पवणा णत्थि कली णाअवइणअरवए ताणम्॥ 52॥

येषां मतिरितरमुखी कालः सकलोपि तेषां कलिविस्तारः।
ये तव पदे प्रवणाः नास्ति कलिर्नागपतिनगरपते तेषाम्॥ **52**॥

अच्चासण्णविणासा अच्चुअ पेच्छन्ति तावए भत्तजणे।
मोक्खरुईण सुमग्गे मूढा दिअहअरमण्डलम्मि व छिद्दम्॥ 53॥

अत्यासन्नविनाशाः अच्युत पश्यन्ति तावके भक्तजने।
मोक्षरुचीनां सुमार्गे मूढा दिवसकरमण्डल इव च्छिद्रम्॥ **53**॥

णितुडिअदुम्माणघणा णिम्मलगुणघडिअतारआपब्भारा।
भासन्तभत्तिजोण्हा णअसच्च फुरन्ति णहणिहा तुह भत्ता॥ 54॥

नित्रुटितदुर्मानघनाः निर्मलगुणघटिततारकाप्राग्भाराः।
भासमानभक्तिज्योत्स्नाः नतसत्य स्फुरन्ति नभोनिभास्तव भक्ताः॥ **54**॥

ण हु जमविसअम्मि गई णअसच्च पअम्बुअं तुह पवण्णाणम्।
खलिआण वि जहजोग्गं सिक्खा सुद्धन्तकिङ्कराण व लहुई॥ 55॥

न खलु यमविषये गतिः नतसत्य पदाम्बुजं तव प्रपन्नानाम्।
स्खलितानामपि यथायोग्यं शिक्षा शुद्धान्तकिङ्कराणामिव लघ्वी॥ **55**॥

कम्मगइदोसदुहिआ कअन्तभिउडीभुअङ्गिदंसणतत्था।
अच्चन्ति तुज्झ चळणे अच्चुअ पब्भट्ठवम्महरसासाआ॥ 56॥

कर्मगतिदोषदुःखिताः कृतान्तभ्रुकुटीभुजङ्गीदर्शनत्रस्ताः।
अर्चन्ति तव चरणौ अच्युत प्रभ्रष्टमन्मथरसास्वादाः॥ **56**॥

आलग्गइ तुह चलणे अच्चुअ विहिणा वि अच्चणा आअरिआ।
जा एक्कन्तिपउत्ता सेसं व सअं सिरेण पडिगेण्हसि तम्॥ 57॥

आलगति तव चरणौ अच्युत विधिनाऽप्यर्चनाऽऽचरिता।
यैकान्तिप्रयुक्ता शेषामिव स्वयं शिरसा प्रतिगृह्णासि ताम्॥ **57** ॥

तुह मुहजोण्हादाविअ माणससससिअन्तपवहसंणिहबा हे।
अच्चुअ ण मुअसि भत्ते कळम्बगोळणिहकण्टअन्तणिअङ्गे॥ 58 ॥

तव मुखज्योत्स्नाद्रावित मानसशशिकान्तप्रवाहसंनिभबाष्पान्।
अच्युत न मुञ्चसि भक्तान् कदम्बगोळनिभकण्टकायमाननिजाङ्गान्॥ **58** ॥

सव्वेसु वि णिव्वेरा सरणागअसच्च गहिअसासअधम्मा।
गअसङ्गा तुह भत्ता जन्ति तुमम् एव्व दुळ्ळहम् इअरेहिम्॥ 59 ॥

सर्वेष्वपि निर्वैराः शरणागतसत्य गृहीतशाश्वतधर्माः।
गतसङ्गास्तव भक्ताः यान्ति त्वामेव दुर्लभमितरैः॥ **59** ॥

अहिवइणअरिन्द तुमम् आसण्णं वि गअणं व सइ दुग्गेज्झम्।
विसएसु विलग्गन्ता तूरन्ता वि ण लहन्ति डोलन्तमणा॥ 60 ॥

अहिपतिनगरेन्द्र त्वाम् आसन्नमपि गगनमिव सदा दुर्ग्राह्यम्।
विषयेषु विलगन्तः त्वरमाणा अपि न लभन्ते डोलायमानमनसः॥ **60** ॥

भत्ता तावअसेवा रसभरिआ सअलरक्खणोसुअरुइणा।
करणाइ धरन्ति चिरं कङ्खिअ मोक्खा वि अच्चुअ तुए ठविआ॥ 61 ॥

भक्तास्तावकसेवा रसभरिताः सकलरक्षणोत्सुकरुचिना।
करणानि धरन्ति चिरं काङ्क्षितमोक्षा अप्यच्युत त्वया स्थापिताः॥ **61** ॥

ठिरगुणगिरिजणिएहिं सन्तारेसि णअसच्च णिअभत्तेहिम्।
जम्मपरिवाडिजलहिं जङ्गमठिरसेउदंसणिज्जेहि जणे॥ 62 ॥

स्थिरगुणगिरिजनितैः सन्तारयसि नतसत्य निजभक्तैः।
जन्मपरिपाटिजलधिं जङ्गमस्थिरसेतुदर्शनीयैर्जनान्॥ **62** ॥

पसमिअभवन्तरभआ पत्तं पत्तं हिअं ति परिपेच्छन्ता।
भावेन्ति तुज्झ भत्ता पिआइहिं व णअसच्च पच्चिमदिअहम्॥ 63॥

प्रशमितभवान्तरभयाः प्राप्तं प्राप्तं हितमिति परिपश्यन्तः।
भावयन्ति तव भक्ताः प्रियातिथिमिव नतसत्य पश्चिमदिवसम्॥ **63**॥

पअडतिमिरम्मि भुवणे पत्तपडिट्ठाविअपरमणाणपईवा।
णिज्जन्ति अच्चुअ तुए णिअं पअं सइ सअंपहं कअकज्जा॥ 64॥

प्रकटतिमिरे भुवने पात्रप्रतिष्ठापितपरमज्ञानप्रदीपाः।
नीयन्तेऽच्युत त्वया निजं पदं सदा स्वयंप्रभं कृतकार्याः॥ **64**॥

दिढतिव्वभत्तिणअणा परिपेच्छन्ता अहिन्दउरणाह तुमम्।
पत्ता तुह साउज्जं पन्तिं पूरेन्ति पण्णइन्दमुहाणम्॥ 65॥

दृढतीव्रभक्तिनयनाः परिपश्यन्तोऽहीन्द्रपुरनाथ त्वाम्।
प्राप्तास्तव सायुज्यं पङ्क्तिं पूरयन्ति पन्नगेन्द्रमुखानाम्॥ **65**॥

संणअसुळहम् अच्चुअ समाहिसोवाणकमविळम्बविमुहिआ।
सरणं गन्तूण तुमं मुत्ता मुउउन्दखत्तबन्धुप्पमुहा॥ 66॥

सन्नतसुलभमच्युत समाधिसोपानक्रमविलम्बविमुखिताः।
शरणं गत्वा त्वां मुक्ता मुचुकुन्दक्षत्रबन्धुप्रमुखाः॥ **66**॥

देवाण पसुसमाणो जन्तू गन्तूण देवणाह तुह पअम्।
तेहिं चिअ सव्वेहिं संसरमाणेहि होइ सइ दिण्णबळी॥ 67॥

देवानां पशुसमानो जन्तुर्गत्वा देवनाथ तव पदम्।
तैरेव सर्वैः संसारमाणैर्भवति सदा दत्तबलिः॥ **67**॥

मोहन्धारमहण्णव मुच्छिअमाआमहारअणिपच्चूहो।
अच्चुअ तुज्झ कडक्खो विमुत्तिपत्थाणपुडमपरिअरबन्धो॥ 68॥

मोहान्धकारमहार्णव मूर्छितमायामहारजनिप्रत्यूषः।
अच्युत तव कटाक्षो विमुक्तिप्रस्थानप्रथमपरिकरबन्धः ॥ **68** ॥

मोक्खसुहरुक्खमूळं मोहजराउरमहारसाअणपवरम्।
सअलकुसलेक्कखेत्तं किङ्करसच्च तुह कित्तणम् अमिअणिहम् ॥ 69 ॥

मोक्षसुखवृक्षमूलं मोहजरातुरमहारसायनप्रवरम्।
सकलकुशलैकक्षेत्रं किङ्करसत्य तव कीर्तनममृतनिभम् ॥ **69** ॥

णत्थि अहिक्कमणासो विच्छेअम्मि वि ण पच्चवाअपसङ्गो।
सप्पा वि तुह सपज्जा रक्खइ अच्चुअ महत्तरादु भआदो ॥ 70 ॥

नास्त्यमिक्रमनाशो विच्छेदेऽपि न प्रत्यवायप्रसङ्गः।
स्वल्पाऽपि तव सपर्या रक्षत्यच्युत महत्तरात्भयात् ॥ **70** ॥

अपसाए अपसण्णा तुज्झ पसाअम्मि दाससच्च पसण्णा।
आरज्झा होन्ति परे किं तेहि पसङ्गलम्भिअपहावेहिम् ॥ 71 ॥

अप्रसादे अप्रसन्नाः तव प्रसादे दाससत्य प्रसन्नाः।
आराध्या भवन्ति परे किं तैः प्रसङ्गलम्भितप्रभावैः ॥ **71** ॥

इअरतिअसा पसण्णा किङ्करसच्च मह किं णु काहिन्ति हिअम्।
णीहारघणसएहिं णहु पूरिज्जइ कहं वि चाअअतिण्हा ॥ 72 ॥

इतरत्रिदशाः प्रसन्नाः किङ्करसत्य मम किं नु करिष्यन्ति हितम्।
नीहारघनशतैः न खलु पूर्यते कथमपि चातकतृष्णा ॥ **72** ॥

अणुगअसुहमिअतिण्हा अच्चुअ वीसमइ तुज्झ मामअतिण्हा।
पवहेसु पसरिआए आसिअपवहन्तघणकिवासरिआए ॥ 73 ॥

अनुगतसुखमृगतृष्णा अच्युत विश्राम्यति तव मामकतृष्णा।
प्रवाहेषु प्रसृतायाः आश्रितप्रवहद्घनकृपासरितः ॥ **73** ॥

विअलसअलङ्गविसमे धम्मे णअसच्च धअणिहे धारेन्तो।
कन्तारपन्थओ विअ खळन्तचळणोम्हि काअरविसीरन्तो॥ 74 ॥

विकलसकलाङ्गविषमान् धर्मान् नतसत्य ध्वजनिभान् धारयन्।
कान्तारपान्थक इव स्खलच्चरणोऽस्मि कातरविशीर्यमाणः॥ 74 ॥

ठिरधम्मवम्मथइअम् अधम्मपवणाण अग्गखन्धपउत्तम्।
अघडन्तविपडिसारम् अच्चुअ मं हससि णूण लच्छिसमक्खम्॥ 75 ॥

स्थिरधर्मवर्मस्थगितम् अधर्मप्रवणानामग्रस्कन्धप्रवृत्तम्।
अघटमानविप्रतीसारम् अच्युत मां हससि नूनं लक्ष्मीसमक्षम्॥ 75 ॥

तरिउम् अच्चुअ दुरिअम् इमम्मि देहम्मि एक्कदिअहे वि कअम्।
काळो अळं ण सअळो कळुणाए तुज्झ पुण्णपत्तं म्हि इमो॥ 76 ॥

तरितुमच्युत दुरितम् अस्मिन् देह एकदिवसेऽपिकृतम्।
कालोऽलं न सकलः करुणायास्तव पूर्णपात्रमस्म्ययम्॥ 76 ॥

अच्चुअ तुज्झ गुणाणं मह दोसाणं वि णत्थि कुत्थ वि गणणा।
तह वि जओ पुढमाणम् अहिअं लीणाण होइ ण हु दोब्बळ्ळम्॥ 77 ॥

अच्युत तव गुणानां मम दोषाणामपि नास्ति कुत्रापि गणना।
तथापि जयः प्रथमानाम् अधिकं लीनानां भवति न खलु दौर्बल्यम्॥ 77 ॥

रत्तिं दिअहम् अच्चुअ तुडिअपडन्ताइ आउदुमखण्डाइम्।
दट्ठूण वि दरिअमणं बालम् एण्हिं वि भरसु मम् अपमत्तो॥ 78 ॥

रात्रिं दिवसमच्युत त्रटितपतन्त्यायुर्द्रुमखण्डानि।
दृष्ट्वापि दृप्तमनसं बालमिदानीमपि भरस्व मामप्रमत्तः॥ 78 ॥

णीसाससङ्कणिज्जे देहे पडळन्तसळिलबिन्दुसरिच्छे।
मुणसि णअसच्च तुं मं जरन्त करणे वि दीहजोव्वणतिण्हम्॥ 79 ॥

निश्वासशङ्कनीये देहे पटलान्तसलिलबिन्दुसदृक्षे।
जानासि नतसत्य त्वं मां जरत्करणेऽपि दीर्घयौवनतृष्णम्॥ **79** ॥

अमुणिअणिअकाअव्वं तिळग्गमुणिएसु मं वि पडिऊळगइम्।
इअ णिअसहावविळिअं हाउं दासाण सच्च णहु तुह जुत्तम्॥ 80 ॥

अज्ञातनिजकर्तव्यं यदृच्छज्ञातेषु मामपि प्रतिकूलगतिम्।
इति निजस्वभावव्रीडितं हातुं दासानां सत्य न खलु तव युक्तम्॥ **80** ॥

कोहं किं करणिज्जं परिहरणिज्जं वि किंति जाणसि सव्वम्।
तीरसि अ तं हिअं मह तिअसेसर कुणसु णिअहिअअणिक्खित्तम्॥ 81 ॥

कोऽहं किं करणीयं परिहरणीयमपि किमिति जानासि सर्वम्।
शक्नोषि च तद्धितं मम त्रिदशेश्वर कुरुष्व निजहृदयनिक्षिप्तम्॥ **81** ॥

एण्हिं उवरिं वि इमो गुणगहिओ दारुपुत्तओ व परवसो।
तस्स वि मह तिअसेसर तीसु वि करणेसु होसु सुहसङ्कप्पो॥ 82 ॥

इदानीमुपर्यप्ययं गुणगृहीतो दारुपुत्रक इव परवशः।
तस्यापि मम त्रिदशेश्वर त्रिष्वपि करणेषु भव सुखसङ्कल्पः॥ **82** ॥

णिअकम्मणिअळजुअळम् अच्चुअ काऊण मह पिअप्पिअवग्गे।
काहे घोरकळेवर काराघरकुहरणिग्गअं काहिसि मम्॥ 83 ॥

निजकर्मनिगळयुगळम् अच्युत कृत्वा मम प्रियाप्रिय वर्गे।
कदा घोरकलेबर कारागृहकुहरनिर्गतं करिष्यसि माम्॥ **83** ॥

हद्दे तुमम्मि कइआ विस्समिअं बम्हधमणिमग्गणिहिन्तम्।
दिणअरदिण्णग्गकरम् अच्चुअ दच्छिहिसि दइअडिम्भं विअ मम्॥ 84 ॥

हार्दे त्वयि कदा विश्रान्तं ब्रह्मधमनिमार्गगमिष्यन्तम्।
दिनकरदत्ताग्रकरम् अच्युत द्रक्ष्यसि दयितडिम्भमिव माम्॥ **84** ॥

काहे अमाणवन्ता अग्गिमुहा आइवाहिआ तुह पुरिसा।
अइळङ्घेहिन्ति मिमम् अच्चुअ तमगहणतिउणमरुकन्तारम्॥ 85॥

कदा अमानवान्ता अग्निमुखा आतिवाहिकास्तव पुरुषाः।
अतिलङ्घयिष्यन्ति माम् अच्युत तमोगहनत्रिगुणमरुआन्तारम्॥ **85**॥

लङ्घिअविरआसरिअं लम्भिअसइसुद्धसत्तमअसोम्मतणुम्।
कअबम्हालङ्कारं काहिसि णअसच्च किङ्करं काहे मम्॥ 86॥

लङ्घितविरजासरितं लम्भितसदाशुद्धसत्त्वमयसौम्यतनुम्।
कृतब्रह्मालङ्कारं करिष्यसि नतसत्य किङ्करं कदा माम्॥ **86**॥

संसारसाअराओ उक्खित्तं तिअसणाह फुरिआळोअम्।
काहेकाहिसि हिअए कोत्थुहमणिदप्पणं व लच्छिपुळइअम्॥ 87॥

संसारसागराद् उत्क्षिप्तं त्रिदशनाथ स्फुरितालोकम्।
कदा करिष्यसि हृदये कौस्तुभमणिदर्पणमिव लक्ष्मीपुलकितम्॥ **87**॥

काहे तुह पअपउमे होहिमि णअसच्च केळिकन्ततिहुवणे।
मअणरिउमउडमण्डण सुरसरिआसोत्तसूइअमहुप्पवहे॥ 88॥

कदा तव पदपद्मे भविष्यामि नतसत्य केळिक्रान्तत्रिभुवने।
मदनरिपुमकुटमण्डन सुरसरित्स्त्रोतस्सूचितमधुप्रवाहे॥ **88**॥

उवणिसआसिरकुसुमम् उत्तंसेऊण तुह पअम्बुअजुअळम्।
दइओ होहिमि कइआ दासो दासाण सच्च सूरिसरिच्छो॥ 89॥

उपनिषच्छिरःकुसुमम् उत्तंस्य तव पदाम्बुजयुगळम्।
दयितो भविष्यामि कदा दासो दासानां सत्य सूरिसदृक्षः॥ **89**॥

अउणोणिउत्तिजोग्गम् ओआरविहारसहअरत्तणधणिअम्।
अप्पसमभोअमेत्तम् अणुहोहिसि देवणाह काहे णु मिमम्॥ 90॥

अपुनर्निवृत्तियोग्यम् अवतारविहारसहचरत्वधन्यम्।
आत्मसमभोगमात्रम् अनुभविष्यसि देवनाथ कदा नु माम्॥ **90** ॥

इअ फुडमणोरहं मम् एआरिसवअणमेत्तसारं वसअम्।
कुणसु णिअ गुणगणेहिं सच्चं दासाण सच्च सइ सच्छन्दो॥ 91 ॥

इति स्फुटमनोरथं माम् एतादृशवचनमात्रसारं वशगम्।
कुरुष्व निजगुणगणैः सत्यं दासानां सत्य सदा स्वच्छन्दः॥ **91** ॥

बाळपवगोव्व तरळो मारुइजाइत्ति साअरं तरिउमणो।
पत्थेमि तुमम् अच्चुअ कङ्खिअपअपउम खमसु मह कावेअम्॥ 92 ॥

बालप्लवग इव तरळो मारुतिजातिरिति सागरं तरितुमनाः।
प्रार्थये त्वामच्युत काङ्क्षितपदपद्म क्षमस्व मम कापेयम्॥ **92** ॥

अच्चुअ विसअक्कन्तं भवण्णवावत्तभमिणिबुड्डुज्जन्तम्।
जणणी थणन्धअं विअ मम् उद्धरिऊण सेवसु सअं पच्छम्॥ 93 ॥

अच्युत विषयाक्रान्तं भवार्णवावर्तभ्रमिनिमज्जन्तम्।
जननी स्तनन्धयमिव मामुद्धृत्य सेवस्व स्वयं पथ्यम्॥ **93** ॥

कम्ममअघम्मतविअं सुहमिअतिण्हाहि काहि वि अतण्णाअम्।
कारेसु णिव्वुअं मं करआसिसिरोहि अच्चुअ कडक्खेहिम्॥ 94 ॥

कर्ममयघर्मतप्तं सुखमृगतृष्णाभिः काभिरप्यनार्द्रम्।
कारयस्व निर्वृतं मां करकाशिशिरैरच्युत कटाक्षैः॥ **94** ॥

तुह चिन्तणविमुहाणं दिट्ठिविसाणं व दंसणाउ मोएन्तो।
अमिअमुहाणं विअ मम् अच्चुअ भत्ताण णेसु णअणासारम्॥ 95 ॥

तव चिन्तनविमुखानां दृष्टिविषाणामिव दर्शनान्मोचयन्।
अमृतमुखानामिव माम् अच्युत भक्तानां गमय नयनासारम्॥ **95** ॥

विसमिळिअमहुणिहेसु अ तणपडिमेसु अ पडिग्गहेसु पळुठिअम्।
अमिअणिहिम्मि व अच्चुअ ठावेसु तुमम्मि णिम्ममं मह हिअअम्॥ 96॥

विषमिळितमधुनिभेषु च तृणप्रतिमेषु च प्रतिग्रहेषु प्रलुठितम्।
अमृतनिधाविवाच्युत स्थापय त्वयि निर्ममं मम हृदयम्॥ **96**॥

णिच्चम् इमम्मि किवणे णिक्खिव णमन्त सच्च णिहिसारिच्छे।
पवहन्तणहपहाझर पसमिअपणमन्तसञ्झरे तुह चलणे॥ 97॥

नित्यमस्मिन् कृपणे निक्षिप नमत्सत्य निधिसदृक्षौ।
प्रवहन्नखप्रभाझर प्रशमितप्रणमत्सञ्ज्वरौ तव चरणौ॥ **97**॥

सरणागओत्ति जणिए जणवाए वि जइ अच्चुअ ण रक्खसि मम्।
होज्ज खु साअर घोसो साअरपुळिणम्मि तारिसं तुह वअणम्॥ 98॥

शरणागत इति जनिते जनवादेऽपि यद्यच्युत न रक्षसि माम्।
भवेत् खलु सागरघोषः सागरपुळिने तादृशं तव वचनम्॥ **98**॥

णिक्खित्तो म्हि अ अगई णिवुणेहि तुमम्मि णाह कारुणिएहिम्।
ते तुह दट्ठूण पिए णिहुअं णअसच्च भरसु अप्पाण भरम्॥ 99॥

निक्षिप्तोऽस्मि चागतिः निपुणैस्त्वयि नाथ कारुणिकैः।
तांस्तव दृष्ट्वा प्रियान् निभृतं नतसत्य भरस्वात्मनो भरम्॥ **99**॥

णअसच्च पक्कणाणिअ गळिअचिलाअभमणिअकुमारं व णिवो।
होज्जन्तजोव्वणवहुं वरोव्व मं लहसु मन्तिअणविण्णविअम्॥ 100॥

नतसत्य पक्कणानीत गळितकिरातभ्रमनिजकुमारमिव नृपः।
भविष्यद्यौवनवधूं वर इव मां लभस्व मन्त्रिजनविज्ञापितम्॥ **100**॥

इअ कइतक्किअकेसरि वेअन्ताअरिअवेङ्कडेसविरइअम्।
सुहअम् अच्चुअसअअं सहिअअहिअएसु सोहउ समग्गगुणम्॥ 101॥

इति कवितार्किककेसरि वेदान्ताचार्यवेङ्कटेशविरचितम्।
सुभगमच्युतशतकं सहृदयहृदयेषु शोभतां समग्रगुणम्॥ **101** ॥

॥ इति अच्युतशतकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥